# Vinayaka Ashtakam

# વિનાયકાષ્ટકમ્

## Document Information

Text title : Vinayaka Ashtakam

File name : vinAyakAShTakam.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : September 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

**Please help to maintain respect for volunteer spirit.**

September 29, 2019

*sanskritdocuments.org*

Vinayaka Ashtakam

# વિનાયકાષ્ટકમ્

એકદન્તમીશપુત્રમાખુવાહમીશ્વરં
    વિઘ્નસઙ્ઘધ્વાન્તસૂર્યમન્તરાયનાયકમ્ ।
અચ્યુતાદ્યશેષદેવપૂજિતાઙ્ઘ્રિપઙ્કજં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૧॥

કામરૂપધારિણં નાગયજ્ઞસૂત્રિણં
    કુઙ્કુમોત્થકાયકાન્તિશોભિતં વરાનનમ્ ।
કાઞ્ચનાભિભાસ્વરં ચ વાસવાદિવન્દિતં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૨॥

નન્દિવાહનન્દને સુરેન્દ્રનાથવન્દિતં
    નન્દિભૃઙ્ગિનન્દનાથનારદાદિનૃત્યકમ્ ।
નન્દગોપનાગરાજપૂર્વકૈર્નમસ્કૃતં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૩॥

સર્પવેષ્ટિતોદરં ચ સર્પમાલધારિણં
    શઙ્કરાદિપૂજિતં શિવાત્મજં સુખાત્મકમ્ ।
સાવધાનતાકરં સરસ્વતીપ્રદાયકં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૪॥

વિઘ્નમત્તનાગસિંહમુગ્રનેત્રનાસિકં
    વિઘ્નમેઘજાલનાશકારિચણ્ડમારુતમ્ ।
વિઘ્નદાવવહ્નિવારિવારિવારિવાહકં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૫॥

વિઘ્નસિન્ધુવાડવાગ્નિમિન્દુખણ્ડમણ્ડિતં
    વિઘ્નગોપમષ્ટસિદ્ધિયુક્તભક્તસેવિતમ્ ।
શૂર્પકર્ણવક્રતુણ્ડકુમ્ભગણ્ડશોભિતં
    વિઘ્નશૈલવજ્રિણં વિનાયકં નમામ્યહમ્ ॥ ૬॥

દક્ષયક્ષપક્ષિમુખ્યરક્ષિતાઙ્ઘ્રિયુગ્મકં
    ભુક્તિમુક્તિયુક્તિશાન્તિયુક્તપૂજિતં વિભુમ્ ।
દેવદેવવંશવૃદ્ધિસિદ્ધિસાધકં મુદા
    વિઘ્નશૈલવર્જિણં વિનાયકં નમામ્યહમ્ ॥ ૭॥

દેવદૈત્યયોગિસિદ્ધચારણાભિસેવિતં
    સર્પખેટભૂજભૂતસઙ્ઘસાધુવેષ્ટિતમ્ ।
ઈપ્સિતાર્થદાયકં વિશેષકર્મકારકં
    વિઘ્નશૈલવર્જિણં વિનાયકં નમામ્યહમ્ ॥ ૮॥

શ્રીવિનાયકાષ્ટકં હિ શઙ્કરેણ નિર્મિતં
    શઙ્કરસ્ય સૌખ્યદં ભક્તવિઘ્નનાશકમ્ ।
યે પઠન્તિ સાદરં સમસ્તસિદ્ધિદં સ્તવં
    તે ત્વભીષ્ટસિદ્ધિપાત્રભાવમાપ્નુવન્તિ શમ્ ॥ ૯॥

ઇતિ વિનાયકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Vinayaka Ashtakam*

pdf was typeset on September 29, 2019

Please send corrections to *sanskrit@cheerful.com*